श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्व्यशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्व्यशीतितमः सर्गः ॥

## अगस्त्याश्रमाच्छ्रीरामस्यायोध्यां प्रति प्रस्थानम्

ऋषेर्वचनमाज्ञाय रामः सन्ध्यामुपासितुम्।
अपाक्रामत् सरः पुण्यमप्सरोगणसेवितम्॥ **7.82.1** ॥

तत्रोदकमुपस्पृश्य सन्ध्यामन्वास्य पश्चिमाम्।
आश्रमं प्राविशद् रामः कुम्भयोनेर्महात्मनः॥ **7.82.2** ॥

तस्यागस्त्यो बहुगुणं कन्दमूलं तथौषधम्।
शाल्यादीनि पवित्राणि भोजनार्थमकल्पयत्॥ **7.82.3** ॥

स भुक्तवान् नरश्रेष्ठस्तदन्नममृतोपमम्।
प्रीतश्च परितुष्टश्च तां रात्रिं समुपाविशत्॥ **7.82.4** ॥

प्रभाते काल्यमुत्थाय कृत्वाऽऽह्निकमरिन्दमः।
ऋषिं समुपचक्राम गमनाय रघूत्तमः॥ **7.82.5** ॥

अभिवाद्याब्रवीद् रामो महर्षिं कुम्भसम्भवम्।
आपृच्छे स्वां पुरीं गन्तुं मामनुज्ञातुमर्हसि॥ **7.82.6** ॥

धन्योऽस्म्यनुगृहीतोऽस्मि दर्शनेन महात्मनः।
द्रष्टुं चैवागमिष्यामि पावनार्थमिहात्मनः॥ **7.82.7** ॥

तथा वदति काकुत्स्थे वाक्यमद्भुतदर्शनम्।
उवाच परमप्रीतो धर्मनेत्रस्तपोधनः॥ **7.82.8** ॥

अत्यद्भुतमिदं वाक्यं तव राम शुभाक्षरम्।
पावनः सर्वभूतानां त्वमेव रघुनन्दन॥ **7.82.9** ॥

मुहूर्तमपि राम त्वां येऽनुपश्यन्ति केचन।
पाविताः स्वर्गभूताश्च पूज्यास्ते त्रिदिवेश्वरैः॥ **7.82.10** ॥

ये च त्वां घोरचक्षुर्भिः पश्यन्ति प्राणिनो भुवि।
हतास्ते यमदण्डेन सद्यो निरयगामिनः॥ **7.82.11** ॥

ईदृशस्त्वं रघुश्रेष्ठ पावनः सर्वदेहिनाम्।
भुवि त्वां कथयन्तो हि सिद्धिमेष्यन्ति राघव॥ **7.82.12** ॥

त्वं गच्छारिष्टमव्यग्रः पन्थानमकुतोभयम्।
प्रशाधि राज्यं धर्मेण गतिर्हि जगतो भवान्॥ **7.82.13** ॥

एवमुक्तस्तु मुनिना प्राञ्जलिः प्रग्रहो नृपः।
अभ्यवादयत प्राज्ञस्तमृषिं सत्यशीलिनम्॥ **7.82.14** ॥

अभिवाद्य ऋषिश्रेष्ठं तांश्च सर्वांस्तपोधनान्।
अध्यारोहत् तदव्यग्रः पुष्पकं हेमभूषितम्॥ **7.82.15** ॥

तं प्रयान्तं मुनिगणा आशीर्वादैः समन्ततः।
अपूजयन् महेन्द्राभं सहस्राक्षमिवामराः॥ **7.82.16** ॥

खस्थः स ददृशे रामः पुष्पके हेमभूषिते।
शशी मेघसमीपस्थो यथा जलधरागमे॥ **7.82.17** ॥

**ततोऽर्धदिवसे प्राप्ते पूज्यमानस्ततस्ततः।**
**अयोध्यां प्राप्य काकुत्स्थो मध्यकक्षामवातरत्॥ 7.82.18॥**

**ततो विसृज्य रुचिरं पुष्पकं कामगामिनम्।**
**विसर्जयित्वा गच्छेति स्वस्ति तेऽस्त्विति च प्रभुः॥ 7.82.19॥**

**कक्षान्तरस्थितं क्षिप्रं द्वाःस्थं रामोऽब्रवीद् वचः।**
**लक्ष्मणं भरतं चैव गत्वा तौ लघुविक्रमौ।**
**ममागमनमाख्याय शब्दापयत मा चिरम्॥ 7.82.20॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्व्यशीतितमः सर्गः॥